# Shri Hanumadashtottarashatanama Stotram 4

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૪

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 4

File name : hanumadaShTottarashatanAmastotram4.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Author : Raghupravirayati

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari. See corresopnding nAMAvalI

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૪

(શ્રીરઘુપ્રવીરયતિકૃતમ્)

યસ્ય સંસ્મરણાદેવ પુરુષાર્થચતુષ્ટયમ્ ।
લભ્યતે શ્રીહનુમતે નમસ્તસ્મૈ મહાત્મને ॥ ૧॥

ૐ હનૂમાન્ વાયુતનયઃ કેસરીપ્રિયનન્દનઃ ।
અઞ્જનાનન્દનઃ શ્રીમાન્ પિઙ્ગાક્ષોઽમિતવિક્રમઃ ॥ ૨॥

સર્વલક્ષણસમ્પન્નઃ કલ્યાણગુણવારિધિઃ ।
સ્વર્ણવર્ણો મહાકાયો મહાવીર્યો મહાદ્યુતિઃ ॥ ૩॥

મહાબલો મહૌદાર્યઃ સુગ્રીવાભીષ્ટદાયકઃ ।
રામદાસાગ્રણીર્ભક્તમનોરથસુરદ્રુમઃ ॥ ૪॥

અરિષ્ટધ્વાન્તતરણિઃ સર્વદોષવિવર્જિતઃ ।
ગોષ્પદીકૃતવારાશિઃ સીતાદર્શનલાલસઃ ॥ ૫॥

દેવર્ષિસંસ્તુતશ્ચિત્રકર્મા જિતખગેશ્વરઃ ।
મનોજવો વાયુજવો ભગવાન્ પ્લવગર્ષભઃ ॥ ૬॥

સુરપ્રસૂનાભિવૃષ્ટઃ સિદ્ધગન્ધર્વસેવિતઃ ।
દશયોજનવિસ્તીર્ણકાયવાનમ્બરાશ્રયઃ ॥

મહાયોગી મહોત્સાહો મહાબાહુઃ પ્રતાપવાન્ ।
રામદ્વેષિજનાસહ્યઃ સજ્જનપ્રિયદર્શનઃ ॥ ૮॥

રામાઙ્ગુલીયવાન્ સર્વશ્રમહીનો જગત્પતિઃ ।
મૈનાકવિપ્રિયઃ સિન્ધુસંસ્તુતઃ કદ્રુરક્ષકઃ ॥ ૯॥

દેવમાનપ્રદઃ સાધુઃ સિંહિકાવધપણ્ડિતઃ ।
લઙ્કિણ્યભયદાતા ચ સીતાશોકવિનાશનઃ ॥ ૧૦॥

જાનકીપ્રિયસલ્લાપશ્ચૂડામણિધરઃ કપિઃ ।

દશાનનવરચ્છેત્તા મશકીકૃતરાક્ષસઃ ॥ ૧૧॥

લઙ્કાભયઙ્કરઃ સપ્તમન્ત્રિપુત્રવિનાશનઃ ।
દુર્ધર્ષપ્રાણહર્તા ચ યૂપાક્ષવધકારકઃ ॥ ૧૨॥

વિરૂપાક્ષાન્તકારી ચ ભાસકર્ણશિરોહરઃ ।
પ્રભાસપ્રાણહર્તા ચ તૃતીયાંશવિનાશનઃ ॥ ૧૩॥

અક્ષરાક્ષસસંહારી તૃણીકૃતદશાનનઃ ।
સ્વપુચ્છગાગ્નિનિર્દગ્ધલઙ્કાપુરવરોઽવ્યયઃ ॥ ૧૪॥

આનન્દવારિધિર્ધન્યો મેઘગમ્ભીરનિઃસ્વનઃ ।
કપિપ્રવીરસમ્પૂજ્યો મધુભક્ષણતત્પરઃ ॥ ૧૫॥

રામબાહુસમાશ્લિષ્ટો ભવિષ્યચ્ચતુરાનનઃ ।
સત્યલોકેશ્વરઃ પ્રાણો વિભીષણવરપ્રદઃ ॥ ૧૬॥

ધૂમ્રાક્ષપ્રાણહર્તા ચ કપિસૈન્યવિવર્ધનઃ ।
ત્રિશીર્ષાન્તકરો મત્તનાશનોઽકમ્પનાન્તકઃ ॥

દેવાન્તકાન્તકઃ શૂરો યુદ્ધોન્મત્તવિનાશકઃ ।
નિકુમ્ભાન્તકરઃ શત્રુસૂદનઃ સુરવીક્ષિતઃ ॥ ૧૮॥

દશાસ્યગર્વહર્તા ચ લક્ષ્મણપ્રાણદાયકઃ ।
કુમ્ભકર્ણજયી શક્રશત્રુગર્વાપહારકઃ ॥ ૧૯॥

સઞ્જીવનાચલાનેતા મૃગવાનરજીવનઃ ।
જામ્બવત્પ્રિયકૃદ્વીરઃ સુગ્રીવાઙ્ગદસેવિતઃ ॥ ૨૦॥

ભરતપ્રિયસલ્લાપઃ સીતાહારવિરાજિતઃ ।
રામેષ્ટઃ ફલ્ગુનસખઃ શરણ્યત્રાણતત્પરઃ ॥ ૨૧॥

ઉત્પત્તિસ્થિતિસંહારકર્તા કિમ્પુરુષાલયઃ ।
વેદવેદાઙ્ગતત્ત્વજ્ઞો ભવરોગસ્ય ભેષજમ્ ॥ ૨૨॥

ઇત્થં હનુમતઃ પુણ્યં શતમષ્ટોત્તરં પઠન્ ।
વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ ॥ ૨૩॥

કન્યાર્થી લભતે કન્યાં સુતાર્થી લભતે સુતમ્ ।
કીર્ત્યર્થી લભતે કીર્તિં મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ॥ ૨૪॥

રોગાર્તો મુચ્યતે રોગાદ્બદ્ધો મુચ્યેત બન્ધનાત્ ।
ઇદમાયુષ્કરં ધન્યં સર્વોપદ્રવનાશનમ્ ॥ ૨૫॥

સર્વશત્રુક્ષયકરં સર્વપાપપ્રણાશનમ્ ।
સમસ્તયજ્ઞફલદં સર્વતીર્થફલપ્રદમ્ ॥ ૨૬॥

સમસ્તવેદફલદં સર્વદાનફલપ્રદમ્ ।
પઠનીયં મહત્પુણ્યં સર્વસમ્પત્સમૃદ્ધિદમ્ ॥ ૨૭॥

એવમષ્ટોત્તરશતં નામનં હનૂમતો યતિઃ ।
રઘુપ્રવીરાભિધાનઃ કૃતવાન્ વાઞ્છિતાર્થદમ્ ॥ ૨૮॥

ઇતિ શ્રીરઘુપ્રવીરયતિકૃતં શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*Shri Hanumadashtottarashatanama Stotram 4*
pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*